A conch, shell 2.
1 2 1 2
कम्बुः शङ्खः क्षुल्लकाः क्षुद्रशङ्खाः , — A small shell 2.
1 2
शम्बूकास्ते स्युः कपर्दो वराटः ॥६६४॥ — A small shell used as a coin ( कौड़ी ).

A river 24.
1 2 3 4
सिन्धुः स्रवन्ती तटिनी तरङ्गिणी ,
5 6 7 8
नदी धुनी निर्झरिणी च निम्नगा ।
9 10 11
कूलङ्कषा शैवलिनी सरस्वती ,
12 13 14
समुद्रकान्ता ह्रदिनी तथापगा ॥६६५॥
15 16 17 18 19 20
स्रोतः स्रोतस्विनी कर्षूः कुल्या द्वीपवती सरित् ।
21 22 a 23 24
रोधो वप्रस्तु विज्ञेयो भिद्य उद्ध्यो नदः स्मृतः ॥६६६॥

A bank, a shore 6.
1 2 3 4 5 6
तीरं कूलं तटं कच्छः प्रपातो रोध उच्यते ।

Near bank 2. — Opposite shore 2.
b 1 2 1 2
अर्वाक्कूलमपारं स्यात्परं पारमिति स्मृतम् ॥६६७॥

The swelling or rising of a river or sea, flood 2. — A whirl, an pool, eddy whirl 2.
1 2
पात्रं तु कूलयोर्मध्यमावर्तः पयसां भ्रमः ।
1 c 2 1 d 2
पूरः स्यादम्भसो वृद्धिः फेनो डिण्डीर उच्यते ॥६६८॥ — Froth, foam 2.

A stream 6.
1 2 e 3 4 5 6
ओघः प्रवाहो वेणी च धारा स्रोतो रयः स्मृतः ।

Confluence or junction of two rivers 3.
1 2 f 3
सम्भेदः सङ्गमो नद्योः संवेद्यश्च निगद्यते ॥६६९॥

A mound in the middle of a river 2 — Sand, gravel 2.
1 2 3 1 2
सैकतं पुलिनं द्वीपं सिकता वालुका स्मृता ।

An island, a cape. — A lake 2.
1 2
मध्ये द्वीपमन्तरीपं ह्रदस्तोयाशयो मतः ॥६७०॥

The bend of a river 2. — A bridge 2.
1 2 1 g 2
चक्राणि पुटभेदाः स्युः सेतुर्वरण उच्यते ।

Fare 2. — A raft, float 3.
1 2 h 1 2 3
आतरस्तरपण्यं च तल्पं स्यादुडुपः प्लवः ॥६७१॥

A boat, a ship 4. — An oar 2.
1 2 3 4 1 2
तरीर्नौर्मङ्गिनी बेडा नौदण्डः क्षेपणी स्मृता ।

A rudder 2 — The head of a boat 2.
1 2 1 i 2
अरित्रं कोटिपात्रं स्यात्पुलिन्दो मङ्ग उच्यते ॥६७२॥

a उध्यो, उयो, उद्यो, उद्ध्यो b अवाक्कूल c स्यादम्भसां d डिंडिम e वेणी तु f संवेद्यस्तु, संवद्यरक्त निगद्यते g सेतुर्वारणमुच्यते h तल्वं स्यादुडुपं i पल्वणं।